# AGNI MANTRA & GAYATRI MANTRA GHANA PATHA

अग्नेयँ य्य मग्नेऽग्ने यँ य्यज्ञँ य्यज्ञँ य्य मग्नेऽग्ने यँ य्यज्ञम् ।
यँ य्यज्ञँ य्यज्ञँ य्यँ य्यँ यज्ञम॑द्ध्वर म॑द्ध्वरँ य्यज्ञँ य्यँ य्यँ
य्यज्ञम॑द्ध्वरम् । यज्ञम॑द्ध्वर म॑द्ध्वरँ य्यज्ञँ य्यज्ञम॑द्ध्वरँ
विश्वतो॑ विश्वतो॑ - अध्वरँ य्यज्ञँ य्यज्ञम॑द्ध्वरँ विश्वत॑ : ।

अध्वरँ विश्वतो॑ विश्वतो॑ - अध्वरम॑द्ध्वरँ विश्वत॑ :
परिभू : प॑रिभू र्विश्वतो॑ - अध्वरम॑द्ध्वरँ विश्वत॑ :
परिभू : । विश्वत॑ : परिभू : प॑रिभू र्विश्वतो॑ विश्वत॑ :
परिभू रस्यसि॑ परिभू र्विश्वतो॑ विश्वत॑ : परिभू रसि॑ ।

परिभू रस्यसि॑ परिभू : प॑रिभू रसि॑ ।
परिभूरिति॑ परि = भू : ।
असीत्यसि॑ ।।

स इदित्थ्स स इद्देवेषु देवेष्वि थ्स स इद्देवेषु ।
इद्देवेषु देवेष्विदि द्देवेषु गच्छति गच्छति देवेष्विदि
द्देवेषु गच्छति । देवेषु गच्छति गच्छति देवेषु देवेषु
गच्छति । गच्छतीति गच्छति ॥

सोम या या स्सोम सोम यास्तें ते या स्सोम सोम यास्तें ।
यास्तें ते या यास्तें मयोभुवों मयोभुवंस्ते या यास्तें
मयोभुवं : । ते मयोभुवों मयोभुवंस्ते ते मयोभुवं ऊतयं
ऊतयों मयोभुवंस्ते ते मयोभुवं ऊतयं : ।

मयोभुवं ऊतयं ऊतयों मयोभुवों मयोभुवं ऊतय स्सन्ति
सन्त्यूतयों मयोभुवों मयोभुवं ऊतय स्सन्तिं ।
मयोभुव इतिं मय : = भुवं : ।

ऊतय स्सन्ति सन्त्यूतयं ऊतय स्सन्तिं दाशुषें दाशुषे
सन्त्यूतयं ऊतय स्सन्तिं दाशुषें ।
सन्तिं दाशुषें दाशुषे सन्ति सन्तिं दाशुषें ।
दाशुष इतिं दाशुषें ॥

ताभिं र्नो न स्ताभि स्ताभिं र्नोऽविता ऽविता न
स्ताभि स्ताभिं र्नोऽविता । नोऽविता ऽविता नों
नोऽविता भंव भवा विता नों नोऽविता भंव ।
अविता भंव भवा विता ऽविता भंव ।
भवेतिं भव ॥

अग्नि र्मूर्धा मूर्धाऽग्नि रग्नि र्मूर्धा भुवो भुवों मूर्धाऽग्नि
रग्नि र्मूर्धा भुवं : ।
मूर्धा भुवो भुवों मूर्धा मूर्धा भुवं : ।
भुव इति भुवं : ॥

त्वन्नों न स्त्व न्त्वन्नं स्सोम सोम न स्त्व न्त्वन्नं स्सोम ।
न स्सोम सोम नो न स्सोम या या सोंम नो न स्सोम या ।
सोम या या सोंम सोम या तें ते या सोंम सोम या तें' ।

या तें ते या या ते धामांनि धामांनि ते या या ते
धामांनि । ते धामांनि धामांनि ते ते धामांनि ।
धामा नीति धामांनि ।।

तथ्सांवितु स्सांवितु स्तत्त थ्सांवितु वरें''ण्यँ वरें''ण्यꣳ
सवितु स्तत्त थ्सांवितु वरें''ण्यम् ।
सवितु वरें''ण्यँ वरें''ण्यꣳ सवितु स्सांवितु वरें''ण्यं
भर्गो भर्गो वरें''ण्यꣳ सवितु स्सांवितु वरें''ण्यं भर्गः ।

वरे॑ण्यं भर्गो भर्गो वरे॑ण्यँ वरे॑ण्यं भर्गो॑ देवस्यं

देवस्य भर्गो वरे॑ण्यँ वरे॑ण्यं भर्गो॑ देवस्यं ।

भर्गो॑ देवस्यं देवस्य भर्गो भर्गो॑ देवस्यं धीमहि

धीमहि देवस्य भर्गो भर्गो॑ देवस्यं धीमहि ।

देवस्यं धीमहि धीमहि देवस्यं देवस्यं धीमहि ।

धीमहीतिं धीमहि ॥

धियो यो यो धियो धियो यो नों नो यो धियो

धियो यो नं : ।

यो नों नो यो यो नं : प्रचोदयां॑त्

प्रचोदयां॑न्नो यो यो नं : प्रचोदयां॑त् ।

न : प्रचोदयां॑त् प्रचोदयां॑न्नो न : प्रचोदयां॑त् ।

प्रचोदया दितिंप्र = चोदयां॑त् ।।

अचिंत्ती य द्यद चित्य चिंत्ती यच्चंकृम चंकृम

यदचित्य चिंत्ती यच्चंकृम ।

यच्चंकृम चंकृम य द्यच्चंकृमा दैव्ये दैव्यें चकृम

य द्यच्चंकृमा दैव्यें॑ ।

चकृमा दैव्ये दैव्यें चकृम चंकृमा दैव्ये जने जने

दैव्यें चकृम चंकृमा दैव्ये जनें॑ ।

दैव्ये जने जने दैव्ये दैव्ये जनें दीनै र्दीनै र्जने दैव्ये

दैव्ये जनें दीनै : ।

जनें दीनै र्दीनै र्जने जनें दीनै र्दक्षै र्दक्षैं' र्दीनै र्जने
जनें दीनै र्दक्षैं' : । दीनै र्दक्षै र्दक्षैं' र्दीनै र्दीनै र्दक्षै :
प्रभूंती प्रभूंती दक्षैं' र्दीनै र्दीनै र्दक्षै : प्रभूंती ।

दक्षै : प्रभूंती प्रभूंती दक्षै र्दक्षै : प्रभूंती पूरुषत्वतां
पूरुषत्वता प्रभूंती दक्षै र्दक्षै : प्रभूंती पूरुषत्वतां' ।
प्रभूंती पूरुषत्वतां पूरुषत्वता प्रभूंती प्रभूंती पूरुषत्वतां' ।
प्रभूतीति प्र = भूती । पूरुषत्वतेतिं पूरुष = त्वतां' ।।

अग्नेयँ य्यज्ञमंद् ध्वरँ विश्वतं : परिभू रसिं ।
स इद्देवेषुं गच्छति । सोम यास्तें मयो भुवं ऊतय
स्सन्तिं दाशुषें' । ताभिं र्नो विता भंव ।
अग्नि र्मूर्धा भुवं : । त्वन्नं स्सोम याते धामांनि ।

तथ्सवितु र्वरे ण्यं भर्गो देवस्य धीमहि ।
धियो योनः प्रचोदया त् ।

अचित्ती यच्च कृमा दैव्ये जने दीनै र्दक्षै :
प्रभूती पूरु षत्वता ।